(व्यूहविशेषः। यथा, मनुः। ७। १८७।
“वराहमकराभ्यां वा सूच्या वा गरुडेन वा॥”
“सूक्ष्ममुखपश्चाद्भागः पृथुमध्यो वराहव्यूहः। स एव पृथुतरमध्यो गरुडव्यूहः।” इति कुल्लूकभट्टः॥)

गरुड़ध्वजः, पुं, (गरुड़ः ध्वजचिह्नं यस्य। यद्वा, गरुड़ो ध्वजे रथध्वजे यस्य।) विष्णुः। इत्यमरः ।१।१।१९॥ (यथा, विष्णुपुराणे ।५।१।३३।
“इत्युक्त्वा प्रययौ विप्र ! सहदेवैः पितामहः।
समाहितमतिश्चैवं तुष्टाव गरुड़ध्वजम्॥”
अस्य एतन्नामकारणकथा यथा, महाभारते। १। ३३। १२-१७।
“विष्णुना तु तदाकाशे वैनतेयः समेयिवान्।
तस्य नारायणस्तुष्टस्तेनालौल्येन कर्म्मणा॥
तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम्।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः।
अजरश्चामरश्च स्यामम्टतेन विनाप्यहम्।
एवमस्त्विति तं विष्णुरुवाच विनतासुतम्॥”
“ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम्॥”)

गरुड़ाग्रजः, पुं, (गरुड़स्य अग्रजो ज्येष्ठः।) अरुणः। इत्यमरः ।१।३।३२॥ (अस्य गरुड़ाग्रजत्वकथा यथा, महाभारते। १।३१।२४-३४।
“विनता नाम कल्याणी पुत्त्रकामा यशस्विनी।
तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः॥
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः।
आरम्भः सफलो देवि ! भवितायं तवेप्सितः॥
जनयिष्यसि पुत्त्रौ द्वौ वीरौ त्रिभुवनेश्वरौ।
तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा॥
भविष्यतो महाभागौ पुत्त्रौ त्रैलोक्यपूजितौ।
उवाच चैनं भगवान् कश्यपः पुनरेव ह॥
धार्य्यतामप्रमादेन गर्भोऽयं सुमहोदयः।
एतौ सर्व्वपतत्त्रीणामिन्द्रत्वं कारयिष्यतः॥”
“विनता चापि सिद्धार्था बभूव मुदिता तथा।
जनयामास पुत्त्रौ द्वावरुणं गरुड़ं तथा॥
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः।
पतत्त्रीणाञ्च गरुड़ इन्द्रत्वेनाभ्यषिच्यत॥”)

गरुड़ाङ्कितं, क्ली, (गरुड़ इव अङ्कितम्। गरुड़सादृश्यादस्य तथात्वम्।) मरकतमणिः। इति शब्दरत्नावली॥

गरुड़ाश्मा, [न्] पुं, (गरुड़वर्णवत् अश्मा प्रस्तरः। गरुड़वर्णसादृश्यात् तथात्वम्।) मरकतमणिः। इति जटाधरः॥

गरुड़ोत्तीर्णं, क्ली, (गरुड़ादुत्तीर्णं वर्णेनेति शेषः। यद्वा, गरुड़ उत्तीर्णो वर्णेनातिक्रान्तो येन।) मरकतमणिः। इति राजनिर्घण्टः॥

गरुत्, पुं, (गृणाति शब्दायते वायुवेगवशादिति। गॄ शि शब्दे+“म्रुग्रोरुतिः।” उणां। १। ९६। इति उतिः।) पक्षः। इत्यमरः। २। ५। ३६॥ पाखा इति भाषा॥ (गिरतीति। गॄ निगरणे+उतिः। निगरणम्। भक्षणम्। यथा, यजुर्व्वेदे।१७।७२। “सुपर्णोऽसि गरुत्मान् पृष्ठे।” “अग्ने ! त्वं सुपर्णोऽसि सुपर्णपक्षाकारो गरुड़ोऽसि गरुत्मान् गरुत् गरणं गिलनं भक्ष अस्यास्तीति गरुत्मान् अशनायत्वानित्यर्थः।” इति वेददीधितिः॥)

गरुत्मान्, [त्] पुं, (गरुतः पक्षाः सन्त्यस्य। गरुत्+मतुप्।) गरुड़ः। इत्यमरः। १।१।३१। (यथा, भागवते। ३। १९। ११।
“जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम्॥”) पक्षिमात्रम्। इति मेदिनी। ते। १९६॥

गरुद्योधी, [न्] पुं, (गरुता पक्षेण युध्यतीति। युध्+णिनिः।) भारतीपक्षी। इति त्रिकाण्डशेषः॥ भारद्द इति भाषा॥

गर्गः, पुं, (गृणाति वेदध्वनिना शब्दायते स्तौति इत्यर्थः। गॄ शि शब्दे+“मुदिग्रोर्गग्गौ।” उणां। १।१२७। इति गः।) मुनिविशेषः। स तु गयाक्षेत्रे यज्ञार्थं सृष्टो ब्रह्मणः पुत्त्रः। इति वायुपुराणे गयामाहात्म्ये २ अध्यायः॥ (वृहस्पतिवंशसमुद्भवोऽन्यो मुनिभेदः। स तु वितथस्य पुत्त्रः। यथा, हरिवंशे। ३२। १५—२०।
“वृहस्पतेरङ्गिरसः पुत्त्रो राजन्महामुनिः।
संक्रामितो भरद्वाजो मरुद्भिः क्रतुभिर्व्विभुः॥
अत्रैवोदाहरन्तीमं भरद्वाजस्य धीमतः।
धर्म्मसंक्रमणञ्चापि मरुद्भिर्भरताय वै॥
अयाजयद्भरद्वाजो महद्भिः क्रतुभिर्हि तम्।
पूर्व्वन्तु वितथे तस्य कृते वै पुत्त्रजन्मनि॥
ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत्।
पौत्रेऽथ वितथे जाते भरतस्तु दिवं ययौ॥
वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ।
स चापि वितथः पुत्त्रान् जनयामास पञ्च वै॥
सुहोत्रञ्च सुहोतारं गयं गर्गन्तथैव च॥”
अयं हि शिवमाराध्य चतुःषष्ट्याङ्गज्योतिषादिज्ञानमलभत। यथा, महाभारते। १३।१८।३८।
गर्ग उवाच।
“चतुःषष्ट्याङ्गमददत् कलाज्ञानं ममाद्भुतम्।
सरस्वत्यास्तटे तुष्टो (शिवः) मनोयज्ञेन पाण्डव!॥”
तथा, वृहत्संहितायाम्। २१। ५।
“न तु तन्मतं बहूनां गर्गादीनां मतं वक्ष्ये॥”*॥) तालविशेषः। यथा, सङ्गीतदामोदरे।
“चतुर्द्रुतं विरामान्तं तालोऽयं गर्गसंज्ञितः॥”

गर्गरः, पुं, (ग शि शब्दे+भावे गः। गर्गं शब्दं रातीति। रा+“आतोऽनुपसर्गे कः।”३।२।३। इति कः।) मत्स्यभेदः। इति जटाधरः॥ गागरा इति भाषा॥ अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥ अस्याकारगुणौ यथा, राजनिर्घण्टे।
“यः पीतवर्णोऽपि च पिच्छिलाङ्गः
पृष्ठेषु रेखा बहुलः सशल्कः।
स गर्गरो वर्व्वरनादवक्त्रो
जड़श्च शीतः कफवातकारी॥”
“गर्गरः पित्तलः किञ्चित् वातजित् कफकोपनः।”
इति भावप्रकाशः॥

गर्गरी, स्त्री, (गर्गं शब्दं रातीति। रा+कः। गौरादित्वात् ङीष्।) मन्थनी। दधिमन्थनपात्रम्। इत्यमरः। २। ९। ७४॥ कलसी। गागरी इति भाषा॥ यथा, तिथ्यादितत्त्वे।
“मेषादौ सक्तवो देया वारिपूर्णा च गर्गरी॥”

गर्गाटः, पुं, (गर्गेति शब्दं कृत्वा अटतीति। गर्ग+अट्+पचाद्यच्। शकन्ध्वादिवदकारलोपः।) मत्स्यविशेषः। तत्पर्य्यायः। योगनाविकः २। इति हारावली। १८६॥

गर्ज्ज, ऊर्ज्जाशब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऊर्ज्जा बलम्। सैमत्त्वात् सरोरिति अः तत्करणकशब्दः। गर्ज्जति सिंहः। इति दुर्गादासः॥

गर्ज्ज, क स्वने। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, गर्ज्जयति। इति दुर्गादासः॥

गर्ज्जं, क्ली, (गर्ज्जनमिति। गर्ज्ज+भावे घञ्।) हस्तिशब्दः। इति हेमचन्द्रः। ६। ४१॥ मेघादिशब्दश्च॥

गर्ज्जकः, पुं, (गर्ज्जतीति। गर्ज्ज+ण्वुल्।) मत्स्यविशेषः। गजाड़ इति भाषा॥ तत्पर्य्यायः। शालः। शालजः ३। इति शब्दरत्नावली॥ (शालशब्देऽस्य विवृतिर्ज्ञातव्या॥)

गर्ज्जनं, क्ली, (गर्ज्ज+भावे ल्युट्।) शब्दः। (गर्ज्जतेऽनेनेति। गर्ज्ज+करणे ल्युट्।) कोपः। इति मेदिनी। ने। ५६॥

गर्ज्जरं, क्ली, मूलविशेषः। गाजर इति भाषा॥ तत्पर्य्यायः। पिण्डमूलम् २ पीतकन्दम् ३ सुमूलकम् ४ स्वादुमूलम् ५ सुपीतम् ६ नारङ्गम् ७ पीतमूलकम् ८। अस्य गुणाः। मधुरत्वम्। रुचिकारित्वम्। किञ्चित् कटुत्वम्। कफाध्मानक्रिमिशूलदाहपित्ततृष्णानाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
“गाजरं गृञ्जनं प्रोक्तं तथा नारङ्गवर्णकम्।
गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु॥
संग्राहि रक्तपित्तार्शोग्रहणीकफवातजित्॥”
इति भावप्रकाशः॥

गर्ज्जाफलः, पुं, (गर्ज्जा मर्म्मरध्वनिः फले यस्य। शुष्कपक्वफले शब्दबाहुल्यादस्य तथात्वम्।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥ (गर्ज्जा गर्ज्जनमेव फलं यस्य।) युद्धम्। इति हेमचन्द्रः॥ भर्त्सनम्। उत्तेजनम्। इति शब्दरत्नावली॥

गर्ज्जिः, पुं, (गर्ज्ज ऊर्ज्जाशब्दे+“सर्व्वधातुभ्य इन्।” उणां। ४। ११७। इति इन्।) मेघशब्दः। इति हेमचन्द्रः। ६। ४२॥

गर्ज्जितं, क्ली, (गर्ज्ज+भावे क्तः।) मेघशब्दः। इत्यमरः। १। ३। ८॥ (रणादौ आस्फालनम्। यथा, हरिवंशे। १८२। ४६।
“बाण ! किं गर्ज्जसे मोहात् शूराणां नास्ति गर्ज्जितम्।
एह्येहि युध्यस्व रणे किं वृथा गर्ज्जितेन ते॥”) मत्तशब्दे त्रि॥ (यदुक्तं स्मृतौ।
“सन्ध्यायां गर्ज्जिते मेघे शास्त्रचिन्तां करोति यः।
चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलम्॥”)